
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

दाखल अंक	शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
M-2596	स्मार्त मांगलिक	-	धार्मिक	अपूर्ण	-	3/9	36	संस्कृत	कागद				

श्रीगन॰ श्रमानं = गदीदि ग्रंश

हरनाि रथी न ॥ आदिनीय

रमानानि मडारा १५८६

श्रीगणेशायनमः॥नत्वाश्रीगणनाथस्यचरणंसर्वसिद्धिदं॥बालानांसुखबोधार्थंकरोमि
स्मार्त्तमंजरीं॥१॥तत्रादौस्मार्त्तप्रशंसामाह॥नावसथ्यात्परोधर्मोनावसथ्यात्परंतपः॥ना
वसथ्यात्परंदानंनावसथ्यात्परंधनं॥१॥नावसथ्यात्परोमोक्षोनावसथ्यात्परंयशः॥नावसथ्या
त्परासिद्धिर्नावसथ्यात्परागतिः॥२॥अकरणेप्रत्यवायमाह॥कृतदारोनवैतिष्ठेत्क्षणमप्यग्नि
नाविना॥तिष्ठन्भवेद्द्विजोव्रात्यस्तथाचपतितोभवेत्॥१॥योग्निंस्मार्त्तमज्ञानाद्दस्यकर्मस्नान
जपादिकं॥होमान्समाचरेद्विप्रोनसपुण्येनयुज्यते॥२॥योगृहीत्वाविवाहाग्निंगृहस्थइ
तिमन्यते॥अन्नंतस्यनभोक्तव्यंवृथापाकोहिसःस्मृतः॥३॥वृथापाकस्यभुंजानोप्राय ॥मंज
श्चित्तंविधियते॥प्राणायामत्रयंकृत्वाघृतंप्राश्यविशुध्यति॥४॥करणेफलमाह॥योद ॥१
द्यात्कांचनंमेरुंपृथिवींचससागरां॥तत्सायंप्रातर्होमस्यतुल्यंभवतिवानवा॥१॥अथावस

ध्याधाने॥तद्दारकाले द्यायाद्य काले वा भवति॥यदाविहितकाले कृतं चेत्तदाधानादिकं का
र्यं॥कालातिक्रमेनुप्रायश्चित्तं कृत्वा कार्यं॥प्रायश्चित्तमाह॥यावंत्यब्दान्यतीतानि निरग्ने
र्विप्रजन्मनः॥तावंति कृच्छ्राणि चरेद्धोम्यं दद्याद्द्विजातये॥अथ ज्योतिःशास्त्रोक्तमुहूर्तं विचार्य
तत्पूर्वेद्युः प्रायश्चित्तविधिमाह।अथप्रायश्चित्ते॥तीर्थं गत्वा ब्राह्मणानाहूय कृतस्नानार्द्रवा
सः।ब्राह्मणान्सदक्षिणीकृत्य अनन्योस्साष्टांगं प्रणमेत्।ततः पर्षदग्ने गोद्वयपयोः प्रत्येकं प्रत्या
म्नायत्वेन यथाशक्ति सुवर्णरौप्ययोर्निष्कमार्धं वा तदर्धं वा निधाय॥मम जन्मजन्मप्रभृ
तिज्ञाताज्ञानमल्पह्रस्वल्पकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्त
पीतापीतसकलपातकोपपातकातिपातकलघुपातकसंकलीकरणमलिनीकरणअ
पात्रीकरणजातिभ्रंशकरप्रकीर्णकादिनानापातकादीनां विनाशार्थं प्रायश्चित्तमुद्दिश्य

॥स्मार्त०॥ ममानुग्रहं तु भवंत इत्युक्त्वा पुनः प्रणमेत् ॥ अथ प्रार्थना ॥ सर्वे धर्मविवेक्तारो गोप्तारः स
॥२॥ कला द्विजाः ॥ मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः ॥ मया कृतं महाघोरं ज्ञातमज्ञातकिल्बि
षं ॥ प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ ॥ ततस्तस्य शरीरद्रव्यादिशक्तिमुत्तममध्यमा
दिपक्षांश्च विचार्य अस्मिन् पक्षे अयं शक्त इति निश्चित्य पुस्तकवाचनपूर्वकं सभ्याः कथयेयुः ॥
स च पुस्तकस्य पूजां गंधपुष्पाक्षतादिभिर्विधाय सभ्यापूजां च कृत्वा कृतांजलिपुटो भूत्वा तदुपदि
ष्टं शृणोतु सभ्याश्च षडब्दं अब्दं सार्धं चांद्रायणद्वयमेकेषु कंचन पक्षं शक्त्यानुसारेणोपदिशे
युः ॥ तथा च मितिक्षरायां ॥ जन्मप्रभृति पापानि बहूनि विविधानि च ॥ कृत्वा ब्रह्महत्या ॥ मंज
याः षडब्दं व्रतमाचरेत् ॥ स चोपदेशस्तु तन्मध्ये वृद्धेन सर्वानुमत्या कार्यः ॥ अनेनामुक ॥२
पक्षेण त्वं कृतार्थो भविष्यसीति वदेत् ॥ ततः कर्त्ता इत्थमंगीकृतस्य सायान्हे गंगादितीर्थे गत्वा

चम्य प्राणानायम्य देशकालौ स्मृत्वा मम जन्मप्रभृति ज्ञानाज्ञानसकृदसकृत्कायिक
वाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकोपपातकाति
पातकलघुपातकसंकलीकरणमलिनीकरणअपात्रीकरणजातिभ्रंशकरणप्रकीर्ण
कादिनानापातकादीनां विनाशार्थं सर्वपापक्षयार्थं ब्राह्मणैर्यदुपदिष्टं तत्सर्वोक्तिरांगस
५म हितं करिष्ये। तदंगवपनं दंतधावनं भस्मादिदशस्नानानि पंचगव्यप्राशनं च करिष्ये॥ तत्र
वपने॥ यानि कानि च पापानि ब्रह्महत्यासमानि च॥ केशानाश्रित्य तिष्ठंति तस्मात्के
शान्वपोस्म्यहं॥ कक्षोपस्थशिखावर्जं नखरोमाणि वापइत्वा हविष्यासनपक्षे दंतधावनं॥
तत्र प्रार्थनामंत्रः॥ आयुर्बलं यशोवर्चः प्रजाः पशुवसूनि च॥ ब्रह्मप्रज्ञां च मेधां च त्वन्नो
धेहि वनस्पते॥१॥ अन्नाद्यायेति मंत्रेण दंतधावनं॥ कृत्वा प्रक्षाल्य त्यजेत्॥ अथ स्ना

॥स्मार्त०॥ स्नानानि॥भस्मस्नाने॥तद्यथा॥ईशानायनमइति शिरसि॥तत्पुरुषायनमइति मुखे
॥३॥ ॥अघोरायनमइतिहृदये।वामदेवायनमइतिगुह्ये।सद्योजातायनमइतिपादयोः।प्रण
वेनसर्वांगे।अग्निरितिभस्मेत्यादिभिर्वा॥ततःशुद्धतोयेनस्नानं॥इतिभस्मस्नानं॥
अथगोमयस्नानं॥गंधद्वारामितिगोमयंगृहीत्वा॥अग्रमग्रेचरंतीनामोषधी
नांरसंवने॥तासामृषभपत्नीनांपवित्रंकायशोधनं॥यन्मेरोगांश्चशोकांश्चनुदगो
मयसर्वदा।अभिमेश्च।मानस्तोकइतिशिरःप्रभृतिपादांतंविलिपेत्।शुद्धस्नानं।इ
तिगोमयस्नानं॥अथमृत्तिकास्नानं॥बलिस्थापर्वतानामितिभूमिंप्रार्थ्य।मावो
रिषत्खनितेतिखनित्वा।स्योनापृथिवीतिमृदंगृहीत्वा।आयणेतिपरायणेइतिहृ ॥मं॥
वेंगृहीत्वा।गायत्र्याभ्युक्ष्य।भूमौनिधाय॥आचम्यमृदास्नानंकरिष्यइतिसंकल्प्य:॥ ॥३॥

मृदं कुशोदकेनाभ्युक्ष्य दिक्षु क्षिपेत्॥ त्रातारमिंद्रमिति पूर्वे। यमाय त्वेति दक्षिणे।
तत्वायामीति पश्चिमे। वयः सोमेत्युत्तरतः। तत्सूर्यस्येत्युपरिष्टात्। इदं विष्णुरिति सर्वा
गेषु। शुद्धस्नानं। इति मृत्तिकास्नानं॥ गंगे च यमुने चैव गोदावरि सरस्वति॥ नर्मदे सिं
धु कावेरि जलेस्मिन्संनिधौ भव॥ इति तीर्थान्यावाह्य। आपो हि ष्ठेति त्रिसृचा स्नायात्।
अथ पंचगव्यस्नानं॥ गायत्र्या गोमूत्रं। शुद्धस्नानं। गंधद्वारामिति गोमयेन स्नानं॥ शु
द्धस्नानं। आप्यायस्वेति क्षीरं। शुद्धस्नानं। दधिक्राव्ण इति दध्ना। शुद्धस्नानं॥ घृतेमिति
क्ष इति घृतेन। शुद्धः। देवस्य त्वेति कुशोंभसा अभिषिंचामीति सर्वत्र वाक्यशेषः॥
त्रिर्निमज्ज्याचम्य। स्त्रीशूद्राणाममंत्रकं। स्नानांगतर्पणं। तद्यथा। भूर्देवांस्तर्पयामि॥
भुवः देवांस्त०। स्वर्देवांस्त०। भूर्भुवस्वर्देवांस्त०। ततो निवीती। भूऋषींस्तर्पयामि। भुव

॥स्मार्त०॥ ऋषयस्तृ०। स्वः ऋषयस्तृ०॥ भूर्भुवस्वः ऋषयस्तृ०। ततोपसव्यं दक्षिणामुखः। भूः पितरस्तृ०।
॥४॥ भुवः पितरस्तृ०। स्वः पितरस्तृ०। इति स्नानांगतर्पणं॥ आचम्य। धौतेवाससी परिधाय। तिलकं धृ
त्वा यथोक्तविधिना विष्णुश्राद्धं कर्त्तव्यं तत्तु महाग्रंथे ज्ञातव्यं। अथवा विष्णुमुद्दिश्य त्रीन्ब्रा
ह्मणानां धान्यादिना संपूज्य विष्णुश्राद्धस्य सांगतासिध्यर्थं त्रयेभ्यो ब्राह्मणेभ्यो आमान्नानि सं
प्रदद्यादिति विष्णुश्राद्धं। अथ पूर्वांगं॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश॥ यस्मात्तस्माच्छि
वं मे स्यादिह लोके परत्र च॥ इति मंत्रेण अमुकगोत्रायामुकशर्मणे ब्राह्मणाय इमां गां संप्रद
दे। पंचगव्यसंस्कारान्कृत्वाऽग्नेः स्थापनं। पूर्णाहुतिवदाज्यं संस्कृत्य पापहा विष्णुदैवतेन मंत्राहुति ॥मंजरी
भिरष्टोत्तरशतं मष्टाविंशतिरष्टौ वा जुहुयात्॥ अथ पंचगव्यसंपादनं॥ एकस्मिन्पात्रे गोमू ॥४॥
त्रं त्रिपलं गायत्र्या प्रणवेन वा हाय। अंगुष्ठपर्वपरिमितं गोमयं गंधद्वारामिति। पयः सप्तप

लश्चाप्यायस्वेति।दधिःसप्तपत्नंदधिक्राव्ण्णइति।घृतमेकेपत्नंघृतंमितिक्षइति।कुशोद
कमेकपत्नंआपोहिष्ठेतिचाद्यय।प्रणवेनालोड्य।प्रणवेनामंत्र्य।सप्तकुशपत्रैर्हरितैर्जुहु
यात्।।तद्यथा।इरावतीधेनु॰स्वाहा।इदंपृथिव्यैनमम।इदंविष्णु॰विष्णवेनमम।मानस्तो
के॰इदंरुद्रायन॰।ब्रह्मजज्ञानं॰इदंब्रह्मणेन॰।अग्नयेस्वाहा॰इदमग्नयेनमम।सोमायस्वा
हाइदंसोमाय॰।तत्सवितुः॰इदंसूर्याय॰।ॐस्वाहाइदंप्रजापतयेनमम।भूर्भुवस्वःस्वा
हाइदंप्रजापतयेनमम।ॐअग्नयेस्विष्टकृतेस्वाहानइदमग्नये॰व्रतग्रहणंकरिष्येइति
द्विजान्प्रतिब्रूयात्।तेकुरुष्वेत्यनुज्ञाताः।प्रणवेनसर्वंपिबेत्।एतच्चनद्यादितीरेष्वामाध्या
ह्निर्नक्षत्रदर्शनेकार्यं।अत्यशक्तश्चेत्तत्तुगृहेवाकार्यं।गोमूत्रादिप्रमाणंतुशावंत्स्या।स्वल्पंवाग्रा
ह्यं।।इतिपंचगव्यविधिः।ततोविष्णुंस्मरन्मौनीभूत्वानिशामतिक्रम्यप्रातरुपक्रांतेप्रायश्चित्तं

॥स्मार्त०॥ विधाय। भवद्भिर्यदुपदिष्टं प्रायश्चित्तं तद्युष्मभ्योहं संप्रहरे। ततउत्तरांगं कुर्यात्॥ तद्यथा॥ अग्निंप्र
॥५॥ तिष्ठाप्याज्यसंस्कृत्य व्याहृतिभिर्हुत्वा पंचगव्यं संपाद्य कुशोदकं च प्रणवेनालोड्यामेत्र
चसस्तकुशपत्रैर्गुक्षिपात्॥ इरावती इदं विष्णुर्मानस्तोकेत्र्यंबकं तज्ज्ञानं मंत्रयेत्सोमायतत्सवितुः
प्रणवं व्याहृतिमंत्रयेत्स्विष्टकृते च अर्घ्यग्रहणे करिष्य इति कुरुष्वेत्यनुज्ञातः प्रणवेन सर्वं पिबे
त्॥ विष्णुश्राद्धं च कृत्वांते गवामंगे छित्ति गोदानं चरेत् इत्यकन्नरोगं॥ इति आधानदिवसात्पूर्व
वदिवसे देहशुध्यर्थं प्रायश्चित्तं॥ ७॥ ॥ अथावसथ्याधाने॥ अत्र प्रसंगान्मुहूर्त्तविचारः
क्रियते॥ मांधादिपंचमासेषु श्रावणे चाश्विने तथा॥ कुर्यान्मृगोत्तमांगे वा आधाने शुक्लपक्ष
तः॥१॥ हस्तद्वये विशाखासु कृत्तिकादित्रये तथा॥ पुनर्वसुद्वये तद्वद्रेवती मूलत्तरासु च॥२॥ भौ
मार्किवर्जिते वारे नाधिमासे क्षये तथा॥ चंद्रेऽनुकूले पूर्वाह्ने रिक्तविष्टिविवर्जयेत्॥३॥

एवंप्रकारेणमुहूर्त्तंविचार्याधानंकुर्यात्॥ अथाधानदिनेकृतस्नानः सपत्नीकः प्राङ्मु
खोपविश्य॥ आचम्यप्राणानायम्यदेशकालौस्मृत्वाकालातिक्रमणप्रायश्चित्तंसंक
ल्पः॥ अथावसथ्याधानमुख्यकालातिक्रांतौतावद्वर्षनिरग्निसजनितदुरितक्षया
र्थंअमुकसंख्याकानिकृच्छ्रप्राजापत्यानिजातानितन्मध्येअमुकसंख्याकानिगोदा
नद्वारातथाअमुकसंख्याकानिहिरण्यद्वारातथाअमुकसंख्याकानिअयुतगायत्रीजप
द्वारातथाअमुकसंख्याकरुद्रजपद्वारातथाअमुकसंख्यानिसहस्रतिलहोमद्वारा
तथाअमुकसंख्यानिब्राह्मणभोजनद्वाराचकरिष्ये॥ अथहोमस्य॥ आवसथ्या
धानमुख्यकालातिक्रांतौतावद्दिनसंबंधिसायंप्रातर्होम्यंएतावत्परिमाणंब्राह्म
णेभ्योऽहंसंप्रददे॥ अथवा॥ मुख्यकालदिनादारभ्याद्यपर्यंतलुप्तानांसायंप्रातर्हो

स्मार्त्त० मानो एतावत्परिमाणं द्रव्यं ब्राह्मणेभ्यः संप्रददे॥ बाहोमकरणजनितप्रत्यवायपरि
॥६॥ हारार्थं एतावद्वार्षिकं दधियवतंदुलानाम् अन्यतमं ब्राह्मणेभ्यः। तन्मूल्यं वा। होमद्रव्य
स्यपरिमाणं॥ षष्ठिः प्रस्थमितं धान्ये त्रिः प्रस्थः प्रमितं कृते॥ प्रमृति द्वितीयं मानं प्र
स्थमानचतुष्टयमिति संवत्सरस्योक्तेः॥ इति कालातिक्रमस्य संकल्पः॥ अथ कुंडस्य
पश्चिमभागे उपविश्य पत्नः॥ कुंडं तु वृत्तं प्रकृतिवत्॥ तत्रैकमेखला द्वादशांगुलोच्छ्राचतुरंगु
लविस्तृता च कार्या॥ ननामियानी॥ आचम्य प्राणानायम्य इष्टदेवतानमस्कृत्य सुमुख
श्चेत्यादिदेशकालौ संकीर्त्य एवं गुणविशेषणविशिष्टायां पुण्यतिथौ। श्रीपरमेश्वरप्री
त्यर्थं आवसथ्याधानमग्निकावधानं पंचमहायज्ञसायंप्रातर्होमांश्चाहं करिष्ये॥ तदंग ६
त्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं ब्रह्मवरणं चाहं करिष्ये॥ तत्रादौ निर्वि

घ्नतासिध्यर्थं महागणपतिपूजनं च करिष्ये। उक्तविधिना गणेशपूजनादिनांदीश्राद्धां
तं विधाय। अथ ब्रह्मवरणं। कर्मसु तत्वज्ञं ब्राह्मणं पादप्रक्षालनपूर्वकं गंधादिभिरभ्यर्च्य
सफलवस्त्रादिकं गृहीत्वा प्रार्थयेत्। यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः॥ तथा त्वं मम
यज्ञेस्मिन्ब्रह्मा भव द्विजोत्तम॥ गोत्रोत्पन्नामुकशर्माहं अमुकगोत्रामुकशर्माणं ब्राह्म
णं अस्मिन्नावसथ्याधानाख्यकर्मणि कृताकृतावेक्ष्यरूपत्वेनए भि। मरीलितो पद्ध्वेस्त्वा
महं वृणे। वृतोस्मीति प्रतिवचनं॥ ततो ब्रह्मा समाचारात् यजमानपत्न्योः वाससी दद्यात्।
आवसथ्यपात्राणि गृहीत्वा॥ आवसथ्याग्निसाधनभूतानि इमानि यज्ञपात्राणि पु
वाभ्यां परिगृह्यंतां॥ इति पात्रग्रहणविधिः॥ अथ सर्वासां प्रकृतिविकृतीनां सर्वसा
धारणमादौ कुशकंडिका उच्यते॥ तत्र त्रिभिर्दर्भैः परिसमूहनं। गोमयोदकाभ्यामुपले

॥स्मार्त० पनं। त्रिस्स्पेपनोल्लेखनं॥ अनामिकांगुष्ठाभ्यां त्रिरुद्धृत्य। अधोमुखेन हस्तेन त्रिरभ्युक्ष्य। यत्र
यत्राग्नेस्थापनं तत्र तत्रैव क्रियेते॥ अग्निमुपसमाधाय। दक्षिणतो ब्रह्मासनमास्तीर्य। अग्नेरुत्त
रतो ब्रह्मवरणं॥ तत्र ब्रह्मोपवेशनं यावत्कर्मसमाप्यते तावत्त्वं ब्रह्मा भव। भवामीति प्रतिवच
नं। पूर्वेण ब्रह्मणो गमनं। ब्रह्मासने उपविशति। उत्तरतः प्रणितासनद्वयं कल्पयित्वा॥ वार
णं द्वादशांगुलदीर्घं चतुरंगुलविस्तारं चतुरंगुलखातं। चमसे सव्यहस्ते धृत्वा दक्षिणहस्तधृत
पात्रस्योदकेन पूरयित्वा। पश्चिमासने निधाय। दक्षिणहस्तमध्यमनामिकालभ्य। ब्रह्माण
मवलोक्य। पूर्वासने स्थापयित्वा। तदेव प्रणीताप्रणयनं। ईशान्यादिसोम्यांतः प्रादक्षे रुद्रगर्भैः ।मं
कुशैरग्नेः सव्यं परिस्तरणं॥ अग्नेः पश्चादुत्तरतो वा। अथ वृतां पात्राणां दिशः आसादनं॥
पवित्रछेदनार्थं दर्भास्त्रयः। उपयमनकुशाः पंचप्रभृतयः। समिधस्तिस्रः। स्रुवः। आज्यं। तंडुलाः।

पूर्णपात्रं। दक्षिणावरो वा। इति पात्राण्यासाद्य। पवित्रछेदनैः पवित्रीकरणं। द्वयोरुपरि त्रीणि
निधाय। त्रिमूलेन हौ कुशो प्रदक्षिणीकृत्य। सव्यांगुष्ठोपगे कृत्वा गुष्ठांगुलि पर्वाभ्यां छित्वा तानु
भरतः क्षिपेत्। त्रिरस्याज्याद्विग्रास्य। प्रोक्षणीः सं० स्कृत्य। प्रोक्षणीपात्रं प्रणीतासन्निधायोत्तरतः।
तत्र पात्रांतरेण हस्तेन वा प्रणीतोदकमासिच्य। पवित्राभ्यामुत्पूय। प्रवित्रे प्रोक्षणीं निधा
य। दक्षिणेन प्रोक्षणी पात्रमुत्थाप्यासव्ये कृत्वा। उदकं दक्षिणमध्यमानामिकाभ्यामुद्दिंगनं।।
प्रणीतोदकेन प्रोक्षाणीनां प्रोक्षणं। ततो यथासादित पात्राणां प्रोक्षणं। आज्यस्थाल्याः
प्रोक्षणं।। चरुस्थाल्याः प्रोक्षणं। संम्मार्जनं कुशानां प्रोक्षणं।। उपयमनं कुशानां समि
धां प्रोक्षणं।। स्रुवस्य प्रोक्षणं। आज्यस्य प्रोक्षणं। तंडुलानां प्रोक्षणं। पूर्णपात्रस्य प्रोक्षणं।
असंचरे प्रोक्षणी निधाय अग्निः प्रणितयोर्मध्ये असंचरस्थानं। तत्रस्थापनं। आज्य

॥स्मार्त॰ स्थालीचरुस्थालीमग्नेः पश्चाद्दानीय। आज्यस्थाल्यामाज्यनिर्वापः। पवित्रे अंतर्धाय। चरु
स्थाल्यांचरोर्निक्षेपः। सोदकेचरुतंडुलक्षिः प्रक्षेपः। ब्रह्मणः आज्याधिश्रयणं। तदुत्तरतो य
जमानस्यस्वयंचरोरधिश्रयणंयुगपत्। ईशान्योल्मुकेनउभयोः सकृत्पर्यग्निकरणं। अर्धश्रि
तेस्रुवस्यप्रतपनं। संमार्जनकुशैः स्रुवस्यसंमार्जनं। उत्तानपुष्करस्यस्रुवस्यवामहस्तास्थित
स्यांमूलतोग्रपर्यंतं। अग्रैः संमृज्य। मूलैरग्रमारभ्य अधस्तान्मूलपर्यंतंमूलैः संमृज्य। प्रणीतो
दकेनाभ्युक्ष्य। पुनः प्रतप्य। स्वदक्षिणतोकुशोसनेनिदध्यात्। आज्यमुद्वास्यचरोः पूर्वेणा
नीत्वाग्नेरुत्तरतस्थापइत्वा॥ चरुमुत्थाप्य आज्यस्यपश्चिमतोनीत्वाज्यस्योत्तरतस्थाप
इत्वा। आज्यमग्नेः पश्चाद्दानीय। तदुत्तरतः श्रुवंचानीय। पूर्ववत्पवित्राभ्यामुत्पवनं। आज्या
वेक्षणं। अपद्रव्यनिरसनं। आज्यत्लिप्तेनेपवित्रेणप्रोक्षण्याः प्रत्युत्पवनं। उपयमनान्कु

शानादाय तिष्ठन्समिधोभ्याधायोपविश्य पर्युक्ष्य प्रोक्षण्युदकेन स्रुवेण सपवित्रेण दक्षिणाचु
बुकगृहीतेनाग्निमीशानादिउदकपर्यंतं परिषिच्य। पवित्रे प्रणितासु निधातें। अर्चनं
दक्षिणं जान्वाच्य ब्राह्मणान्वारब्धः। हृदये वामहस्तं निधाय। स्रुवेणादाय जुहुयात्। तत्र
प्रजापतिं मनसा ध्यात्वा संततमृजुं प्रांचदीर्घं पूर्वाघारं जुहोति।। ॐ प्रजापतये स्वाहा इदं प्र॰
इंद्राय स्वाहा इदं॰ पूर्वाघारस्य दक्षिणतः। आग्नेयमुत्तरपूर्वार्द्धे। अग्नये स्वाहा इदमग्न॰ द
क्षिणपूर्वार्द्धे सौम्यं। सोमाय स्वाहा इदं सो॰। सद्दनमोक्षा। ॐ भूः स्वाहा इदमग्नये न॰। ॐ
भुवः स्वाहा इदं वायवे॰ स्वः स्वाहा इदं सूर्याय॰ त्वन्नो अग्ने॰ इदमग्नीवरुणाभ्यां॰ सत्वन्नो
अग्ने॰ इदमग्नीवरुणाभ्यां॰ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया असि।।
अयानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा इदमग्नये अयसे॰ येते सहस्रं वरुणाये

॥स्मार्त॰

सहस्रं यज्ञियाः पाशा वितता महांतः ॥ तेभिर्नोऽ। अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्व
र्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च॰ उदुत्तमं वरुण॰ इ
दं वरुणाय आदित्याय अदितये च न॰ मनसा प्रजापतये स्वाहा इदं प्रजापत॰ अग्नये स्विष्टकृते स्वा
हा इदमग्नये स्विष्टकृते॰ संस्रवप्राशनं ॥ पवित्राभ्यां मार्जनं। वन्होपवित्रप्रतिपत्तिः। तत्पूर्ण
पात्रदानं तुभ्यां प्रणीताविमोकः ॥ एष विधिः सर्वत्र स्मार्त्तकर्मसु भवति ॥ अत्र पात्रप्रोक्षणं
द्वितीयं तेन कर्त्तव्यं ॥ तदुक्तं ॥ द्वितीयं तेन कर्त्तव्यं प्रोक्षणं स्मार्त्त~~[illegible]~~कर्मणि ॥ पात्राणां ह
विषश्चापि मेकनाचे पिधीवरे ॥१॥ पूर्णपात्रस्य लक्षणं ॥ अष्टमुष्टि भवेत्किंचित्किंचिदष्टौ तु
पुष्कलं ॥ पुष्कलानि च चत्वारि पूर्णपात्रं तदुच्यते ॥२॥ यत्राज्यमेव हविस्तत्र प्राजापत्यादि ९
स्विष्टकृदंता अन्वारब्धश्चतुर्दशाहुतयो होतव्याः ॥ यत्र तु आज्यादन्यद्धविश्चेत्तत्र महाव्या

इतिहोमात्प्राक्स्विष्टकृद्धोमः॥ ततोभूरादिप्रजापत्यांतानवाहुतयः। इतिविशेषः। इतिकु
शकंडिका॥ अथब्रह्मवरणानंतरंकर्तव्यतामाह॥ कुंडस्यपश्चिमेभागेउपविश्याचम्य
एवंगुणेत्यादिममोपात्तदुरितक्षयार्थंश्रीपरमेश्वरप्रीत्यर्थंचनित्यनैमित्तिकक्रियाधि
कारायस्मार्ताग्निमहमाधास्यइतिसंकल्प्य॥ कुंडेपूर्ववत्पंचभूसंस्कारान्कृत्वास्वस्ति
नइत्यादिमंगलसूक्तंपठन्महानससमीपेगत्वातत्राग्निंसंसृज्यतस्माग्निर्धूमाग्निना
न्मादिपात्रेन्यस्यतदुपरिएकंपात्रमपिधायवेदघोषेणानीयकुंडमध्ये ग्निमुपस
माधायेतिनिधानं॥ अथारणीपक्षमाह॥ तत्रैवचब्रह्मासुलक्षणचतुर्विंशत्यंगुलीदीर्घे
षडंगुलविस्तृतचतुरंगुलोच्छ्राश्वत्थस्यारणी आदायवस्त्रपरिहिते॥ आवसथ्याग्निमा
धनभूतेइमेअरणीआवाभ्यांपरिगृहीतेइतिपरिगृहीतः। तत्र अधरारणिंपत्नीमुत्तरा

स्मार्त
१०

रणिंयजमानंचप्रयच्छति।तेउत्संगेस्तत्वापीठेपर्यवस्थाप्य।अरणीरजनंकृत्वानमस्कृत्य।
ततःयवोनचतुर्दशांगुलमानेनद्वादशांगुलोद्धामेखलायुक्तेखरेस्रुर्ववस्यंचभस्मसंस्कारा
न्कृत्वा।मंथनंकार्यं।तत्रयजमानःप्राङ्मुखःओवल्लीधारयति।प्रत्यङ्मुखीपत्नीमंथनंक
रोतिपत्न्यामंथनाशक्तौब्राह्मणेनकेनचिन्मंथनंकार्यं।जातस्याग्नेःइंधनैःप्रज्वालनं।खरे
अग्निमुपसमाधाय।दक्षिणतोब्रह्मासनमास्तीर्य।।अग्नेरुत्तरतःब्रह्मवरणं।अस्मि
न्नावसथ्येत्वंब्रह्माभवामीतिप्रतिवचनं।।ततःब्रह्मोपवेशनादिकुशकंडिकोक्तप्रका
रेणआज्यभागांतंकृत्वा।।आज्याहुतीजुहोति।त्वंनोऽअग्नेसत्वंनोअग्नइमंमेवरुणतत
त्वायामियेतेशतमयाश्चाग्नउदुत्तमंभवतंन्नइत्येष्टौपुरस्तादेवमुपरिष्टात्।।ततोब्रह्म
णान्वारब्धः।अष्टर्चहोमः।सर्वत्रहोममंत्रांतेस्वाहाकारःकार्यः।तद्यथा।त्वंनोऽअ

ग्ने। इदमिंद्राग्निभ्यां· त्यागांते ग्नो द्रुक्ष्मप्रक्षेपः सर्वत्र। सत्वन्नो अग्ने· इदमग्निवरुणा
भ्यां· इमंमेवरुण· इदंवरुणायनमम· तत्वायामि· इदंवरुणाय· येतेशतं· इदंवरुणायस
वित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्य· अयाश्चाग्ने· इदमग्नयेअयसेन· उदु
त्तमं· इदंवरुणाय· भवतन्न· इदंजातवेदाभ्यां·। ततःस्थालीपाकहोमः। अभिघार्य। उपां
शु। अग्नयेपवमानायस्वाहा· इदमग्नयेपवमानाय॰ अग्नयेपावकाय· इद॰ अग्न
येशुचयेस्वा· इदम· अदित्यैस्वा· इदमादि· पुनःपूर्ववदष्टर्चहोमः। त्वन्नो अग्ने· सत्वन्
नो अग्ने· इमंमेवरुण· तत्वायामि· येतेशतं· अयाश्चाग्ने·। उदुत्तमं· भवतन्न· इति
स्विष्टकृते चायास्यग्नेर्वषट्कृतं यत्कर्मणात्यारिरिचं वागातुविदइति।। ततश्चरुशे
षादुत्तरार्धात्।। अग्नयेस्विष्टकृतेस्वा· इदम· ततःआज्येन। अयास्यग्नेर्वषट्कृतंय

स्मार्त०
११

त्कर्मणात्यरिरिचंदेवागातुविद्विस्वाहा इदंदेवेभ्योगातुविभ्योनमम॥ततोन्वारब्धः॥
भूरादिप्राजापत्यांतानवाहुतयः पूर्ववत्॥ बर्हिर्हेमःस्वाप्राश्नानिततोब्राह्मणभोजनं।
ततोबर्हिर्होमः। प्रजापतयेस्वाहा इदंप्रजापतयेन॰ अनिरुक्तोवैप्रजापतिरितिव
चनात्। कारिकापि। आज्यंद्रव्यमनादेशेजुहोतिषुविधीयते॥मंत्रस्यदेवतायाश्चप्र
जापतिरितिस्थितिः। ततःसंस्रवप्राशनादिब्रह्मणेदक्षिणादानांतं॥ अस्यावसथ्या
धानाख्यकर्मणःसांगतासिध्यर्थंब्रह्मन्निदंपूर्णपात्रंतुभ्यं॰ प्रणीताविमोकः। अ
स्यकर्म॰ ब्राह्मणमेकंभोजयिष्ये॥ प्रदक्षिणांनमस्कृत्य।स्मृत्यक्तेब्राह्मणसंकल्पः।
अस्यकर्मणःसांगतासिध्यर्थंत्रिंशत्संख्याकान्ब्राह्मणान्भोजयिष्ये।तेनश्रीयज्ञपु
रुषःप्रियतां। ब्राह्मणातर्पणादर्वाक्आधानमध्येस्त्रीरजस्वलास्यात्।तदानचुहोमा

त्पुत्रजननपूर्वकं पुनराधानमावर्त्तते। पत्न्यो रजस्वलायोः सूतिकायोर्वा प्रारब्धक्रिय
तएति गदाधरः। तथा त्रिकांडमंडनः। रजोदोषे समुत्पन्ने सूतके मृतकेपि वा॥ नित्यं नै
मित्तिकं कुर्यात्काम्यं कर्म न किंचन। अतः प्रारब्धस्य सूतकस्य रजोदोषाद्यावपि त्र
नष्टानमेव युक्तं। न शुद्धिप्रतीक्षणं। कारिकारमते तु अधानं न भवतीत्युक्तमेव पू
र्वं। अत्र आधानवत्पुनराधानमित्युक्तत्वात्। संक्षेपतन्निमित्तानि तत्प्रयोगश्च
लिख्यते। अग्नावनुगते यस्य होमकालद्वयं व्रजेत्॥ उभयोर्विप्रवासे वा लौकिके
ग्निर्विधीयते॥१॥ अग्निहोत्रेणरहितपंथानं शतयोजनं॥ आहिताग्निः प्रयायाच्चे
दग्निहोत्रं विनश्यति॥२॥ अब्दस्वयमजुहूत्वा होमानयेद्दक्षिणादिना॥ तस्य स्यात्पुन
राधेयं पवित्रेष्टिरथापि वा॥३॥ विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छ[ति]

॥स्मार्त०॥ कालात्ययेनैस्य पुनराधानमिष्यते ॥५॥ उपघातक्रियालोपउपेक्षाच प्रमादतः ॥ चतु
१२॥ र्भिर्हेतुभिः प्रोक्तं पुनराधानकारणं ॥६॥ प्रसिद्धः कर्मणां लोप उपघातोंत्यजादिना ॥ उपेक्षणं प्रवासा
द्धि प्रमादाग्नेर धारणं ॥६॥ स्पृष्टोग्निर्यदि चांडालेरुदक्यादिभिरेववा ॥ उपघातेषु सर्वे
षु पुनस्त्वेतिस्समंधने ॥७॥ यजमानश्च पत्नी च उभौ प्रवसितौ यदा ॥ अहोमान्न निवर्ते
ते पुनराधानमर्हति ॥८॥ पत्नीसीमामतिक्रांता यजमानो गृहे यदि ॥ आहोमाद्यादि
नागच्छेत्पुनराधानमर्हति ॥९॥ रजोदोषे समुत्पन्ने सूतके मृतके पि वा ॥ प्रवसन्नग्नि
मान्विप्रः पुनराधानमर्हति ॥१०॥ नदीसंतरणे ग्रामसीमातिक्रमणे तथा ॥ सर्वत्राघो
तसीम्नो वास्त्वाग्नि स्पृष्टास्पुरग्नयः ॥ ११ ॥ राष्ट्रभंगादिगमने प्रासेदेशे मनस्वती ॥ जु
हुयाच्चतुरात्रेनस्मार्तेग्नौ सर्वसंज्ञकं ॥१२॥ होमद्वयात्यये दर्शपूर्णमासात्ययेन तथा ॥

पुनरेवाग्निमादध्यादिति भार्गवशासनात् ॥ १३ ॥ नित्यपाकाय शालाग्नेरेकदेशस्य का
र्यतः ॥ पाकार्थमुल्मुकं दत्वा तत्र पक्कान्महानसे ॥ वैश्वदेवाग्न्यागारे स्यात्कार्यार्थोग्निश्च
लौकिकः ॥ होमे नान्तरिते केचिदाहुः सर्वत्र लौकिकः ॥ पचनाग्नौ पचेदन्नं सूतके मृत
केपि वा ॥ अपक्कानुवसेद्रात्रिं पुनराधानमर्हति ॥ १५ ॥ कर्मापिहरणेग्नीनामनानुच्छाम
द्विबोधते ॥ कात्यायनमतात्केचिच्छ्वसन्तोप्यतिदूरतः ॥ १६ ॥ कृतेषु पंक्षहोमेषु पक्षत्रय
मनंतरं ॥ करोति पुनराधेयं मथ्यमानो कृताशनेः ॥ १७ ॥ जलेन हेतुना वह्निरूपशां
तो यदा भवेत् ॥ करोति पुनराधेयं यत्न पार्श्वे निरूपिते ॥ १८ ॥ इति पुनराधाने निमि
त्तानि ॥ अथ पतद्यर्यक्रमः ॥ प्रमादात्त्रिरात्रमग्नित्यागे प्राणायामशतं ॥ विंशतिरा
त्रे एकदिनोपवासः ॥ मासत्रये त्रिरात्रमुपवासः ॥ अब्दे प्राजापत्ये ॥ एके त्यागानुसा

॥स्मार्त्त॰ रेणप्रायश्चित्तं कृत्वा पुनराधानं॥ यत्र तु केनचिन्निमित्तेनाग्निनाशः कालविलंबश्च
॥१३॥ नास्ति तत्र प्रायश्चित्तमकृत्वैव पुनराधानं॥ नित्यक्रियां विधाय देशकालौ संकीर्त्य पु
नराधानदिनमारभ्याद्यपर्यंतं आवसथ्याग्निविच्छेदनजनितप्रत्यवायपरिहारार्थं ए
तावत्प्रायश्चित्तं अमुकद्वाराकरिष्ये॥ लुप्तानां होमानां तंडुलादिद्रव्यं ब्राह्मणाय संप्रद
दे॥ होमं पुरस्तात्॥ पुनराचम्य प्राणानायम्य देशकालौ स्मृत्वा येन निमित्तेन जातस्य वि
च्छिन्नावसथ्यस्य पुनरावसथ्यस्य पुनराधानं करिष्ये॥ नांदीश्राद्धाभावः॥ स्वरे पंचभू
संस्कारान्कृत्वा स्वयोनेरग्निमाहृत्य स्थाप्य॥ ब्रह्मोपवेशनादि ब्राह्मणतर्पणांतमाधान
वत्सर्वं कार्यमिति॥ इति स्मार्त्तमंजर्यां आधानपुनराधाने च॥ ७॥ अथ मणिकावधा
ने॥ देशकालौ स्मृत्वा स्मार्त्तकर्मणि जलसाध्यकर्मोपयोगार्थं श्रीपरमेश्वरप्रीत्यर्थं

मणिकावधानं करिष्ये ॥ उत्तरस्य वंस्यादिशि यस्य वदवटं खात्वा ॥ देवस्य त्वेति मन्त्रेणादाय ।
देवस्य त्वा ॥ आददे नारिरसीत्यंतेन ॥ शाल्यायाईशान्ये अवटपरिलेखः ॥ इदमहमिति
सोमन्तेनापि ॥ उदकोपस्पर्शनं ॥ असतानरिष्टकोश्वान्यानि चाभिमंगलानि तस्मिन् ।
मंगलद्रव्याणि निक्षिप्य ॥ अरिष्टकरीठइति मध्यदेशे प्रसिद्धः ॥ मिनोति मणिकं स
मुद्रोसीति ॥ समुद्रोसि सर्वतो व्यचा इति ॥ अप आसिंचति ॥ आपो रेवती क्षयथाहि वस्व
क्रतुं च भद्रं बिभृताऽमृतं च ॥ रायश्च स्थः स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धात इ
ति पुनरप आसिंचति ॥ आपो हि ष्ठेति तिसृभिः ॥ ततो ब्राह्मणभोजनं संकल्पः ॥ इति
स्मार्त्तमंत्रैर्मणिकावधानं ॥ ७ ॥ ततः आवसथ्यादुल्मुकं गृहीत्वा मणिकोदकेन च ।
महानसे पिंडं कृत्वा तत्र सर्वपाकं पक्त्वा तस्मादुल्मुकमादाय परस्य स्थाने निधाय इदमह

स्मार्त॰॥ रहः कार्यं॥ अथ पंचमहायज्ञाः॥ अग्नेः पश्चादुपविश्याचम्य प्राणानायम्य देशकालौ स्मृ
त्वा श्रीपरमेश्वरप्रीत्यर्थं आवसथ्याग्नौ पंचमहायज्ञैरहं यक्ष्ये इति संकल्प्य मणिकोद
केन पर्युक्ष्य। अभिघार्य मन्त्रैर्द्वादशपर्वपूर्णमाहायजुहुयात्॥ तद्यथा। ॐ ब्रह्मणे स्वाहा इ
दं ब्रं॰ प्रजापतये स्वा॰ इदं प्र॰ गृह्याभ्यः स्वा॰ इदं गृ॰ कश्यपाय स्वा॰ इदं कश्य॰ अनुमतये स्वा॰ इ
दं मनु॰ इति देवयज्ञः॥ मणिके त्रीन्। पर्जन्याय नः इदं प॰ अद्भ्यो नमः इदम॰ पृथिव्यै नः इदं
पृथिव्यै॰ ततो द्वार्ययोः॥ धात्रे न॰ इदं धा॰ विधात्रे न॰ इदं वि॰ प्रतिदिशं वायवे॰ इदं॰ वायवे॰
वायवे न॰ इदं वा॰ वायवे न॰ इदं वाय॰ वायवे॰ इदं वा॰ दिशां च। प्राच्यै दिशे न॰ इदं प्रा॰ दक्षिणा
यै दिशे॰ इदं द॰ प्रतीच्यै दिशे॰ इदं प्र॰ उदीच्यै दिशे॰ इदमु॰ मध्ये त्रीन् ब्रह्मणे न॰ इदं ब्रह्म॰ अं
तरिक्षाय न॰ इदं अं॰ सूर्याय न॰ इदं सूर्याय॰ तेषामुत्तरतः विश्वेभ्यो देवेभ्यो॰ इदं वि॰ विश्वे

स्वधाभू· इदंवि· तदुत्तरतः उषसेन· इदमुष· भूतानांचपतयेन· इदंभू· इतिभूतयज्ञः।म
ध्यत्रयाणांदक्षिणतः अपसव्येसव्यजान्वाच्य।।पितृभ्यःस्वधानमः इदंपि· इतिपितृ
य·पात्रा।णनिज्योगरापरस्यांदिशि।यक्ष्मैतत्तेनमः इदंयक्ष्मे· अथमनुष्ययज्ञः।।ततः
कायबलिर्बहिर्दद्यात्।।तद्यथा ऐंद्रवरुणवायव्यासौम्यानैर्ऋतकास्तथा।।वायसाः
प्रतिगृह्णंतुभूमौपिंडंमयार्पितं।।१।।इदंवायसेभ्यो·।द्वौश्वानौश्यामशबलौवैवस्व
तकुलोद्भवौ।।ताभ्यांपिंडंप्रदास्यामिरक्षतांपथिमेसदा।।२।।इदंश्वभ्यानादिभ्यः।।
देवामनुष्याःपशवोवयांसिसिद्धाश्चयक्षोरगभूतदैत्यसंघाः।।प्रेताःपिशाचास्तर
वःसमस्तायेचान्नमिच्छंतिमयाप्रदत्तं।।३।।इदंदेवादिभ्यो·पिपीलिकाःकीटपतं
गकाद्याबुभुक्षिताःकर्मनिबद्धबद्धाः।।तृप्त्यर्थमन्नंहिमयाप्रदत्तंतेषामिदंतेमुदिता

भवंतु॥ ४॥ इदं पि॰ पादौ प्रक्षाल्याचम्य अतिथिप्राप्तौ पादप्रक्षालनपूर्वकं गंधमाल्या
दिभिरभ्यर्च्य ग्रासचतुष्टयपरिमितमुदकपूर्वकमन्नमादाय॥ इदमन्नं सनकादिमनुष्ये
भ्यो हंत तइति॥ इति मनुष्ययज्ञः॥ अथ ब्रह्मयज्ञः॥ तत्र प्रागग्रेषु दर्भेषु प्राङ्मुख उपवि
ष्टः पवित्रपाणिः अन्यान्दर्भान्पाणिभ्यामवदाय प्रणवव्याहृतिपूर्वां गायत्रीं स्वरेणाधीत्य
॥ ॐ इषे त्वेत्यादिवेदमारभ्य यथाशक्ति कंडिकाध्यायौ वा पठित्वा ब्राह्मणं पठेत्॥ ॐ स्व
स्तीत्यंते वदेत्॥ जपयज्ञप्रसिद्ध्यै प्रतिदिने चाध्यात्मिकी विद्यां उपनिषदपि क्रमेण ब्रह्म
येज्ञांते पठेत्॥ एवमेव गीतादिपाठः॥ दर्भानुदके क्षिपेत्॥ अथ वैश्वदेवनिर्णयः॥ श्राद्धात्प्रा
गेव कुर्वीत वैश्वदेवं तु साग्निकः॥ एकादशाहिकं मुक्त्वा तत्र त्वंते [strikethrough]वावसथ्यस्य पुनरा
धाने करिष्ये[/strikethrough]॥ नांदीश्राद्धाभावः॥ खरे पंचभूसंस्कारान्कृत्वा स्वयोनेरग्निमानय

विधीयते॥कातीयानांतु स्मार्त्तश्रौताग्नि मतामाद्यावेव। अन्येषांमंते॥ इतिस्मा॰पं
चमहायज्ञाः॥अथ सायंप्रातर्होमविधिः॥तत्रास्तमिंते सायंहोमविधिः॥ तत्रसं
ध्यावंदनोत्तरमग्नेः पश्चादुपविश्याचम्य प्राणानायम्य देशकालौस्मृत्वा। श्रीयज्ञ
पुरुषप्रीत्यर्थं आवसथ्योस्तमितंइ लद्रव्येणयवदधिद्रव्येणवासायंप्रातर्हो
माभ्यांयक्ष्ये। तत्रसायंहोमेनाहंयक्ष्ये॥ उपयमनप्रभृत्योपासनस्य॥ उपयमन
कुशानादाय॥तिष्ठन्समिधोभ्याधाय। मणिकोदकेनपर्युक्ष्य। प्रदीप्तेग्नौअंगुल्यु
त्तरपार्श्वेनसमिन्मूलतोग्नेरंगुल्य प्रदेशेजुहुयात्॥ अग्नयेस्वाहा॰ इदम॰ संस्रवर
क्षणं। पुनःप्रजापतयेस्वा॰ इदंप्र॰ संस्रवरक्षणं। संस्रवप्राशनमाचम्य॥ अत्रस
मास्त्वेत्यनुवाकेनोपस्थानं। प्रदक्षिणीकृत्यनमस्कृत्यकृतेनसायंहोमविधिना

॥स्मार्त०॥ श्रीयज्ञपुरुषःप्रीयतां॥इति॥अथसायंहोमकालमाह॥यावत्सम्यङ्नभाव्यंतेनभस्यृ
॥१६॥ क्षाणिसर्वतः॥लोहितत्वंचनोयैतिवत्सायंतुहूयते॥अथानुदितेप्रातर्होमविधिःसा
यंहोमवत्॥सायंद्रव्येणैव॥ततःप्रातःसंध्योत्तरमग्नेःपश्चात्।आचम्यप्राणानायम्य
देशकालौस्मृत्वाश्रीयज्ञपुरुषप्रीत्यर्थंआवसथ्याग्नौसमित्तंडुलद्रव्येणप्रातर्होमे
नाहंयक्ष्ये॥उपयमनकुशानादाय।समिधोभ्यादाय।पर्युक्ष्य।जुहुयात्।सूर्यायस्वा॰इ
दंसू॰प्रजापतयेस्वा॰इदंप्र॰संस्रवप्राशनं।आचम्यविश्वा॰इत्यनुवाकेनोपस्थानं।अ
त्रसंस्रवप्राशनंदधिपक्षेतंडुलपक्षेच॥अक्षतपक्षेत्वभावः।अहुनीयत्वादितिभर्तृयज्ञः॥
अथानुदितस्यलक्षणं॥तद्विधेर्वि॥अनुदितःसमयाध्युषितश्च॥तथाचमनुः॥उदिते
नुदितेचैवसमयाध्युषितेतथा॥तत्रानुदितस्यस्पष्टातारकोपलक्षितः॥ततःपरंउदया

स्त्राकसमयाध्युषितः॥ संपूर्णादित्यमंडलदर्शनोपलक्षितउदितः॥ तत्रअस्माकंस्व
त्रे अनुदितएवपरमुक्तं। मनुवचनेउदितग्रहणं॥ शांखोतरस्थत्वाभिप्रायेण॥ मुख्यका
लेयदाहोमोनभवतितदागौणकालेपिकार्यः॥ तथाचमंडनः। मुख्यकालेयदावश्यं
कर्मकर्त्तुंनशक्यते। गौणकालेपिकर्त्तव्यंगौणोप्यत्रेदृशोभवेत्॥१॥ गौणकालपरि
माणं॥ आसायमाहुतेःकालात्कालेत्तिप्रातराहुतेः॥ प्रातराहुतिकालात्कालःस्या
त्सायमाहुतेरिति॥ अथहोमाधिकारी॥ यजमानःप्रधानस्यात्पत्नीपुत्रश्चकन्य
का॥ ऋत्विक्शिष्योगुरुर्भ्राताभागिनेयःसुतापतिः॥ एतैरेवहुतंयच्चतद्धुतंस्वय
मेवतु॥ पत्नीकन्याचजुहुयाद्विनापर्युक्षणंक्रियामिति॥ होम्यान्याह॥ पयोदधिस
र्पिर्यवागूरोदनतंडुलाःसोमस्तैलमापोव्रीहयोयवास्तिलाइति॥ अथापत्काले

कर्त्तव्यो होमद्वयसमासप्रयोगः। तन्त्रेण। सचैव॥ आचम्य प्राणानायम्यादि। श्रीयज्ञपुरुष
प्रीत्यर्थं आवसथ्याग्नौ समितंडुलद्रव्येण समस्यंतविधिनात्सायप्रातर्होमाभ्यां यक्ष्ये। तत्र
सायंप्रातर्होमाभ्यां यक्ष्ये। पर्युक्षणांते कृत्वा। अग्नयेस्वाहा इदंमग्न॰ द्वितीयामाहुतिं पात्रां
तरेत्यस्य। ततस्तृतीयामादाय। सूर्यायस्वाहा इदं सू॰ ततश्चतुर्थाहुतिं द्वितीयाहुतीमे
कीत्यसहैव जुहुयात्। प्रजापतयस्वाहा इदं प्र॰ इति समासहोमद्वयविधिः॥ अथ गुर्वा
पद्दिपक्षहोमः। तत्र प्रतिपदि सायंकाले। आचम्य प्राणानायम्य देशकालौ स्मृत्वा। श्री
यज्ञपुरुषप्रीत्यर्थमावसथ्येग्नौ द्रव्येण अद्यप्रतिपत्सायमारभ्य यावत्सायंचतुर्दशी
पर्यंतं। तथाच। द्वितीयाप्रातरारभ्य यावद्दर्शपौर्णमासं वा प्रातःपर्यंतं समस्यंतविधि
नासायंप्रातःपक्षहोमाभ्यां यक्ष्ये॥ तत्र सायंपक्षहोमेनाहं यक्ष्ये। उपयमनादानादि

पर्युक्ष्य पर्यग्निं कृत्वा। आहुतिप्रमाणेन तंडुलान् पात्रद्वये प्रतिपात्रं चतुर्दशवारं गृहीत्वा
प्रथमपात्रस्थान्। अग्नये स्वाहा॰ इदं॰ ततो द्वितीयपात्रस्थान् प्रजापतये स्वाहा॰ इदं प्रजाप॰
उपस्थानं पूर्ववत्॥ इति सायंपक्षहोमविधिः। अथ प्रातःपक्षहोमविधिः॥ आचम्य प्रा
णानायम्य देशकालौ॰ द्वितीयामारभ्य यावद्दर्शपौर्णमासे वा प्रातःपर्यंतं श्रीयज्ञपुरुष
प्रीत्यर्थं आवसथ्याग्नौ तंडुलद्रव्येण प्रातःपक्षहोमेनाहं यक्ष्ये। पर्युक्ष्य पर्यग्निं कृत्वा पूर्ववत्
पात्रद्वये तंडुलान् कृत्वा जुहुयात्॥ सूर्याय स्वाहा इदं सू॰ प्रजापतये स्वाहा इदं॰ उपस्थानं
पूर्ववत्॥ अथ पक्षमध्ये आपतितशेषहोमविधिः॥ तत्र यस्यां तिथौ क्रियते। तत्तिथिमार
भ्य चतुर्दशीसायंपर्यंतं सायंशेषहोमेनाहं यक्ष्ये। प्रातः तत्तिथिमारभ्य दर्शपूर्णमासे वा
प्रातःपर्यंतं प्रातःशेषहोमेनाहं यक्ष्ये इति विशेषः। अन्यत् पक्षहोमवत्॥ आहुतीना

णनातुयावतिथिस्तावत्॥इतिहोमशेषहोमविधिः॥सर्वथापर्वसायंहोमःप्रतिपत्प्रात
र्होमश्च पृथगेवहोतव्यौ॥तत्र पूर्ववदग्निमभिरक्षेत्॥अंतरापन्तिवृत्तौनुतदारभ्यपूर्व
वत्सायंप्रातर्होमान्यथाकालंकुर्यात्॥अनापदिपक्षहोमनिषेधः॥तदुक्तं॥अनातुरोऽ
प्रवासीचनिश्चितोनिरुपद्रवः॥पक्षहोमंतुयःकुर्यात्सचरेत्पतितव्रतं॥इतिस्मार्त्तमंज
र्यांसायंप्रातर्होमविधिः॥अथदर्शपौर्णमासपक्षादिः॥तत्राधानेतरंप्रथमप्रतिपदि
प्रातस्नात्वाकृतानित्यक्रियानिर्णेजनोतंवैश्वदेवंकृत्वाआचम्यप्राणानायम्यादि॰
श्रीपरमेश्वरप्रीत्यर्थंदर्शपौर्णमासाभ्यांयक्ष्ये॥तदंगभूतंस्वस्तिपुण्याहवाचनंमातृ
कापूजनंनांदीश्राद्धंवाहंकरिष्ये॥तत्रादौनिर्विघ्नपरिसमाप्त्यर्थंमहागणपतिपूज
नमहंकरिष्ये॥गणेशपूजनादिनांदीश्राद्धांतंविधाय॥अग्नेःपश्चादुपविश्यपुनर्दे

शाकालोस्मृत्वा। ममोपात्तदुरितक्षयार्थं श्रीयज्ञपुरुषप्रीत्यर्थं आवसथ्याग्नौ दर्शपौ
र्णमासपक्षादिकर्मभ्यां यक्ष्ये॥ तत्र पौर्णमासपक्षादिकर्मणाहं यक्ष्ये। अन्ता।नो ब्रह्म
णः प्रणीतानां चासनन्वतुष्टयं कुर्यादिति हरिहरः। तत्र कुशकंडिकोक्तप्रकारेण ब्र
ह्मोपवेशनादि आज्यभागांतं चरुसहितं कुर्यात्॥ पात्रासादने तंडुलानेतरं वैश्वदेवा
र्थस्यासादनं प्रोक्षणं च आज्यभागांते चरुमभिघार्य। दर्शपौर्णमासदेवताभ्यो हुत्वा
जुहोति। अग्नये स्वा· इदम· उपांशु अग्नीषोमाभ्यां स्वा· इदम· उच्चैः अग्नीषोमाभ्यां·
इद· ब्रह्मणे स्वा· इदं· प्रजापतये स्वा· इदं प्र· विश्वेभ्यो देवेभ्य स्वा· इदं विश्वे· द्यावापृथि
वीभ्यां· स्वा· इदं द्या· ततस्तेनैव चरुणा उत्तरतो बलिहरणं। विश्वेभ्यो देवेभ्यो न· इदं वि·
भूतगृह्येभ्यो नमः इदं· आकाशाय· इदं मा·। वैश्वदेवस्याग्नौ जुहोति। अभिघार्य। अ

ग्नयेस्वा॰ इदमग्न॰ प्रजापतयेस्वा॰ इदं॰ विश्वेभ्यो देवेभ्यः स्वा॰ इदं॰ उभयो
अग्नये स्विष्टकृते स्वाहा॥ इदम॰ ततो भूरादि प्राजापत्यांता नवाहुतयः॥ अन्वारब्ध
धीताविमोकांते॥ दक्षिणादाने॥ अस्य पौर्णमास पक्षादि कर्मणः सांगता सिध्यर्थं संस्रवप्राशनादिपु
हर्णपात्रं संप्रददे॥ बात्यत स्त्रिवल्यं हरन्ति॥ नमस्त्रियै न॰ इदं स्त्रि॰। नमः पुंसे वयसे वय
सेन॰ इदं पुं॰ नमः शुक्लाय कृष्णदंताय पापीनां पतये न॰ इदं शु॰ नमो ये मे प्रजामुपलोभयं
तिष्ठामे वसंतनु तवारण्ये पतेभ्यो न॰ इदं न॰ नमोस्तु बलिमेभ्यो हरामि स्वस्ति मेस्तु प्रजांमे
ददतु॰ इदमेभ्यो न॰ शेषमद्भिः प्लुप्लाव्य॥ अस्य कर्मणः सांगता सिध्यर्थं ब्राह्मणमेकंभो
जयिष्ये॥ प्रदक्षिणा नमस्कारं च कुर्यात्॥ अस्य कर्मणः सांगता सिध्यर्थं यथासंख्याका
न्ब्राह्मणान्भोजयिष्ये॥ तेन श्रीयज्ञपुरुषः प्रीयतां॥ नांदीश्राद्धं तं प्रथम प्रायोगे भवति

नप्रतिप्रयोगे ॥ अथयागकालः ॥ पर्वणोयश्चतुर्थांशः आद्यः प्रतिपदस्त्रयः ॥ यागका
लः स विज्ञेयः प्रातर्युक्तो मनीषिभिः ॥ तथा ॥ आवर्त्तनेयवा प्रातर्यदि पर्वसमाप्यते ॥ तत्र
पूर्वाह्णिक एव स्यात्संधेरूर्ध्वं द्विजासैवानं ॥ प्रतिवृद्धौ क्षये सेधिष्णानोपायहेमो ॥ तिथ्यः पर
स्याद्घटिकाश्चायास्युर्न्यूनास्तथैवाभ्यधिकाश्चतासां ॥ अर्धंविप्रयोज्यं च तथाप्रयोज्यं
ह्रासे च वृद्धौ प्रथमेऽहि नेस्यात् ॥१॥ ननु आधानानंतरं यदि पौर्णमासपक्षादि आ
यातिचेत्तदा तस्यां प्रारंभो युक्तः । यदि दर्शपक्षादि आयातिचेत्तदा तस्यां प्रथमारंभः
कर्त्तव्यो वा न वा इति संदेहः । तदुक्तं हरिहरभाष्ये ॥ सायमादि प्रातरंतमेकं कर्म प्रच
क्षते ॥ पौर्णमासादिदर्शांतमेकमेव विदुर्बुधा इति वचनात्कृष्णपक्षे यद्याधानं तदा
दर्शमनिष्ट्वैव पौर्णमास्यां पक्षादि कर्मारंभः । यत्तु छंदोगपरिशिष्टवचनं ॥ तूर्ध्वं कृष्णा

स्मार्त॰ कुर्तेर्दर्शपौर्णमासोदि चाग्निमान्॥ यश्चायाति स होतव्यस एवादिरिति श्रुतेरेतत्पुन
२० राधानविषयं॥ यत्तु श्राधानानंतरं भुक्त्वा कृत्स्नावाप्रतिपन्नवेन तस्यां पश्चादिकमैतिन्का
पेर्श्वाक्किरपतदिति। तदा बाधा कालविषयं॥ कृष्णपक्षे यदि विभागस्तदा तत्रे बाधानस्य
प्रारंभोयुक्तः नैव कालविलंबेन प्रमाणाभावाद्धि माभोत्तरं कार्यमेव॥ ततो या प्रति
पद्यायाति तस्यां प्रारंभ इति। यद्यारंभकाले सूनक मलमास गुरुशुक्रास्तवाल्यवार्धि
क्यग्रहणादि भवति तदापि प्रारंभः कार्यः। यानि तु तत्रारंभनिषेधकानि॥ उपरागो
धिमासश्च प्रथमे चैव पर्वणि॥ तथा मलिम्लुचे पौषे नान्वारंभणमिष्यते॥ इत्यादि
निबंधनानि श्रौतस्मार्तादिनास्व कालेनुत्कं तस्यास्थालीपाकादिप्रारंभविषयाणि
। तथा च नामकर्म च दर्शेष्टिर्यथाकाले समाचरेत्॥ श्रतिपाते सति तयोः प्रशस्तेमा

सिपुष्पमे इति॥ अथ दर्शे विशेषः॥ तत्राधानंतरं यामावास्या आयाति तस्यां त्रे
धा द्विधा वा विभक्ते दिनतृतीयांशे षपरमक्षये पिंडपितृयज्ञः। तस्मिन्क्षीणे द्दाती
तिक्रांते॥ परमक्षयोऽत्र विवक्षितः॥ दिनद्वयेप्यपराह्णैकदेशव्याप्तौ सत्यां परदि
ने अर्धघटिकामात्रपरिमितामावास्याभेपि तत्रैव पिंडपितृयज्ञानुष्ठानमुचितं पिंडपितृ
यज्ञकालस्य वाजसनेयिशाखायामुपदेशाद्यागकालस्यानुपदेशात्पिंडपितृयज्ञ
दिनात्परदिने यागः कार्यः। यद्यपि चंद्रदर्शने यागनिषेधः स्मर्यते। तथापि उक्तन्या
येन वाजसनेयिनां पिंडपितृयज्ञपरदिन एव॥ चंद्रदर्शनसत्त्वेपि यागानुष्ठानस्यो
चितत्वाद्वाजसनेयिव्यतिरिक्तविषयत्वेन पूर्वाह्णमध्याह्नसंधिविषयत्वेन वा नि
षेधो नेतव्यः॥ अयं च मतं पितृकस्यैव भवति॥ अथास्य स्पष्टप्रयोगः॥ आदौ वैश्व

॥स्मार्त॰ देवः॥ आचम्य प्राणानायम्य देशकालौ स्मृत्वा श्रीयज्ञपुरुषप्रीत्यर्थं पिंडपितृयज्ञेनाहं
२१ यक्ष्ये॥ तदंगभूतं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं चाहं करिष्ये॥ तत्र निर्विघ्न
परिसमाप्त्यर्थं महागणेशपूजनमहं करिष्ये॥ उक्तप्रकारेण नांदीश्राद्धांतं कृत्वा॥ पुनः ए
वंगुणेत्यादि श्रीयज्ञपुरुषप्रीत्यर्थं आवसथ्येऽग्नौ पिंडपितृयज्ञेनाहं यक्ष्ये॥ अत्र सर्वकर्मा
पसव्येन दक्षिणामुखेन कार्यं॥॥ तिलकुशानादाय प्राचीननीति विबंधे॥ ततोग्नेर्दक्षि
णसंस्थमपसव्यं परिस्तरणं॥ अग्नेः पश्चादुत्तरतो वा दक्षिणसंस्थपात्रासादनं॥ कृष्णा
जिनं॥ स्फ्यः। उलूखलं। मुसलं। शूर्पं चरुस्थाली। उदकं। आज्यं। मेक्षणं। वस्त्रं। उदपात्रं।
सकृदाछिन्नानि। व्रीहयः। सूत्राणि च। एकैकशः पात्रासादनं॥ अपरेणाग्निं चरुम
दर्पणं स्रुकं च वा गृह्णाति॥ ततो अग्नेरुत्तरतः कृष्णाजिनमास्तीर्य। तत्र उलूखले व्रीही

नोप्यतिष्ठतो वहनं। शूर्पेन्सुप्य निष्पवनं। सकृत्पत्नीकरणं। सारतंडुलमहूर्णे अपवि-
त्वाभिघार्योद्वास्य दक्षिणतः। दक्षिणमुखएवमेक्षणेन जुहोति। अग्नये कव्यवाहना
य स्वाहा। इदम। सोमाय पितृमते स्वाहा। इदं सो। प्रा३पत दक्षिणेनोल्लिखति स्फ्येन। अप
हता असुरा। अपरेण वा उल्मुकं परस्तात्करोतीति ये रूपाणीति। ये रू। स्मस्मात्। उदपा
त्रेणावनेजयति। असाववनेनिक्ष्वेति पितृप्रभृति त्रीन्। गोत्र पित अमुकशर्मन् वसु
रूपे रेखामूले अवनेनिक्ष्व। गोत्र पितामह अमुकशर्मन् रुद्ररूपरेखामध्ये अवने
निक्ष्व। गोत्र प्रपितामह अमुकशर्मन् आदित्यरूपरेखान्ते अवनेनिक्ष्व। सकृदाच्छि
न्नानि रेखायां कृत्वा यथावनिक्तं पिंडान् ददाति असावेतत इति। गोत्र पित अमुकश
र्मन् वसुरूप एतत्तेन्नं स्वधा इदं पितामह प्रपितामहयोः। अत्र पितर इति जपः। उदङ्

॥स्मार्त्त॰॥ स्त। आतमनादाहृत्याउअपसव्यावर्त्तनं। अ। मीमदंतेतिजपः॥ अवनेज्यपूर्ववत्। निवीवि
॥२२॥ स्मपूर्वस्यपिंडानामुपरि। नमो व इति षडंजलीन्करोति। नमो वः पितरः सव्यं गृहान्नइतिज
पः। एतद्व इत्यपास्यतिसूत्राणि प्रतिपिंडं॥ ऊर्णादिदशा वा॥ ऊर्जमित्यपोनिषिंचति। ऊर्जंव
हं पिंडानामुपरि। अवधायावजिघ्रति। उत्खायांपिंडावधानं। अवजिघ्रति। काण्वानांतु।
आदौ उत्खावघ्राणं पुनः पिंडानपीतिश्रुतेः॥ उल्मुकस्य छेदः छिन्नात्स्यग्नावाधते॥ सव्यमा
चमनं॥ कृतेन पिंडपितृयज्ञेन विधिना श्रीयज्ञपुरुषप्रियेतां॥ ततः पार्वणविधिना दर्श
श्राद्धं इति पिंडपितृयज्ञः॥ श्वः प्रतिपदि दर्शपक्षादिकर्मसर्वं पौर्णमासपक्षादिवत्॥ नांदी
श्राद्धाभावः। यत्र विशेषस्तत्रोच्यते॥ आचम्य प्राणानायम्येत्यादि श्रीयज्ञपुरुषप्रीत्य
र्थमावसथ्येग्नौ दर्शपक्षादिकर्मणाहं यक्ष्ये। ब्रह्मोपवेशनाद्याज्यभागांते कृत्वास्था

लीपाकेन दर्शदेवता जुहोति॥ अग्नये स्वाहा• इदम• उपांशुविष्णवे स्वाहा• इदं• इंद्राग्नीभ्या
ं स्वाहा• इदमिंद्रा• ग्नेत्यादि ब्राह्मणतर्पणांतं दर्शवत्॥ सर्वत्र पूर्वस्थालीपाकः॥ प
श्चाद्वैश्वदेवः॥ तदुक्तं कारिकायां॥ अकृते वैश्वदेवे तु स्थालीपाकाः प्रकीर्तिताः॥ अ
न्यत्रापि तत्पक्षात्तु सोपराह्णे विधीयते॥ प्रथमायां प्रतिपदि तु आभ्युदैकात्पूर्वं कार्यं॥ अ
मावास्यांतस्याकरणे वैश्वानरश्चरुः प्रायश्चित्तं न तस्य पुनः करणमिति॥ इति स्मा
र्तमंजर्यां दर्शपौर्णमासस्थालीपाकः॥ अथ नवान्नप्राशनं॥ तत्र प्रथमप्रयोगे आहो
विश्वेदेवः॥ आचम्य प्राणानायम्य देशकालौ स्मृत्वा श्रीपरमेश्वरप्रीत्यर्थं नवान्न
प्राशनाख्यं कर्मणाहं पृष्ये॥ तदंगभूतं स्वस्ति पुण्याहवाचनं मातृकापूजनं नांदीश्रा
द्धं चाहं करिष्ये॥ तत्रादौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं करिष्ये॥ उक्तविधिना

॥स्मार्त्त॥ मादिश्राद्धांतं विधाय। अग्नेः पश्चादुपवेश्य। एवं गुणेत्यादि॥ श्रीयज्ञपुरुषप्रीत्यर्थं
॥२३॥ मावसथ्याग्नौ श्रीहिनवान्नप्राशनाख्यं कर्मणाहं यक्ष्ये॥ दक्षिणतोब्रह्मासनना
स्तीर्य ब्रह्मवरणादिकुशकंडिकोक्तविधिना आज्यभागांतं कृत्वा आज्याहुतीर्जु
होति॥ शतायुधाय शतवीर्याय शतोतये भिमातिषाहे॥ शतं यो नः शरदो अजीजा
दिंद्रो नेषदति दुरितानि विश्वा स्वाहा। इदमिंद्राय न मम॥ ये चत्वारः पथयो देवयाना अं
तरा द्यावापृथिवी वियंति॥ तेषां यो अज्यानिमजीजिमावहात्तस्मै नो देवाः परिदत्तेह स
र्वे स्वाहा। इदं सर्वेभ्यो देवेभ्यो॰ ततश्चरुमभिघार्य॥ आग्रयणदेवताभ्यो हुत्वा जुहो
ति॥ इंद्राग्निभ्यां स्वा॰ इदं॰ विश्वेभ्यो देवेभ्यः स्वाहा। इदं॰ द्यावापृथिवीभ्यां स्वा॰
इदं॰ ततः आज्याहुतिः॥ स्विष्टमग्ने अभितत्पृणीहि विश्वांश्च देवाः पृतना अभि

ष्यन्तू॥सुगन्तु पंथां प्रदिशन्न एहिज्योतिष्मध्येह्यजरान्न आयुः स्वाहा इदमग्नयेन॰
वरुणा स्विष्टकृत॥अन्वारब्धः॥अग्नये स्विष्टकृते स्वा॰ इदमग्न॰ ततोदशाज्याहु
तयेः॥स्विष्टमग्ने अभितत्पृणीहि॰ भूराद्यानवाहुतयः॥अथ संस्रव प्राशने मंत्रे
ण॥अग्निः प्रथमः प्राश्नातु सहि वेद यथा हविः॥शिवा अस्मभ्यमोषधीः कृष्णोतु
विश्वचर्षणिः॥भद्रान्नः श्रेयस मनेष्ट देवा स्त्वया वसेन समसी महि त्वा॥सनोमया
भूः पितो आविशस्व शंतो कायतन्वे स्या नोइलिव्री हि संस्रव प्राशने॥अन्नपते
न्नस्यैवा॰ यवभावे विशेषः॥एतमु सं मधुना संयुतं यव॒ं सरस्वत्या अधिवनायच
कृषुः॥इंद्र आसीत्सीरपतिः शतक्रतुः कीनाशा॰ आसन्मरुतः सुदानव इति॥
ततः पवित्राभ्यां मार्जनादिब्राह्मण्यासंकल्पांतं॥७॥अथ प्रकृति विकृति याग

कालानो पर्वणिनिर्णयः॥ आवर्त्तनात्प्राग्यदि पर्वसंधिः कृत्वातु तस्मिन्प्रकृतिं
विकृत्याः॥ तदैव यागः परतो यदिस्यात्तस्मिन्विकृत्या प्रकृतिं परेद्युः॥ सुपर्वाभावेम
मुहूर्त्ते कार्यं॥ तच्च नक्षत्राणि॥ कृत्तिकादि विशाखांतं देवनक्षत्रे पुरेवती अश्विनी
श्रवणधनिष्ठा उत्तरा च पंचेति॥ बुधो गुरो रवौ रिक्तातिरिक्ततिथिषु॥ अन्यद्विरुद्धं
वर्ज्यं॥ शरदि व्रीहीणां वसंते यवानां च कार्यं॥ एतद्यदा स्वकालेन संभवति॥ तदा गौणे
कार्यं॥ व्रीह्याग्रयणं शरदि चेन्न संभवति तदा यवाग्रयणात्पुरा श्यामाकादिद्रव्यं कृत्वा
कार्यं॥ यवाग्रयणं चैवमेव॥ अकृत्वाग्रयणेन वान्नस्य विस्मृत्वा पचनं भोजनं च
क्रियते तदा अग्नये वैश्वानराय चरुः। कृत्यं। पिंडपितृयज्ञाकरणे च॥ नूतन व्रीही
णामभावे नूतनशालिभिः॥ यवानामभावे नूतनैर्गोधूमैश्च कर्तव्यं॥ इति स्मार्तम

जयेनिवान्नप्राशने॥ अथोपाकर्म॥ तच्चोत्सर्गपूर्वकं॥ आदौ वैश्वदेवः॥ प्रथ
मेयोगे॥ आचम्य प्राणानायम्य देशकालौ स्मृत्वा श्रीपरमेश्वरप्रीत्यर्थं उत्सर्गो
पाकर्मणि मित्ते स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं चाहं करिष्ये। तत्रा
दौ निर्विघ्नतासिध्यर्थं महागणपतिपूजनमहं करिष्ये॥ उक्तविधिना नांदीश्राद्धं
ते कृत्वा॥ अस्नातातिलदर्भदूर्वापामार्गगोमयमृत्तिकाकुष्यपर्णगंधपुष्पधूपदी
पाच्छादनसूत्रयज्ञोपवीतनैवेद्यतांबूलादीनि गृहीत्वा ग्रामादुदक् शिष्यैश्च श्रो
त्रियैः सह रम्यं जलाशयं गच्छेत्॥ तत्तीरं प्रक्षाल्य मृत्तिकादिकं विन्यस्य यथोक्तं
शौचं कुर्यात्॥ सर्वे यज्ञोपवीतिनो बद्धशिखिनो दर्भपाणयो उपविश्याचम्य प्राणा
नायम्य देशकालौ स्मृत्वा छंदसामुत्सर्गमहं करिष्ये॥ सर्वे सह मामन्त्रं च गुरुशिष्य

॥स्मार्त॰॥ श्वजपति॥ उभाकवीयुवायोनोधर्मः परापतत्॥ परिसरस्व स्यधर्मणो विसख्यानि
॥२५॥ विसृज्यामहे॥ शिष्याः गुरुमभिवादयेत्। यथाज्येष्ठमभिवादयेयुः॥ अथ गणस्नानप्र
योगः॥ दर्भपाणिः॥ आचम्य प्राणानायम्य गणेशस्मरणादि देशकालौ संकीर्त्य म
म सशिष्यस्य सर्त्विजः सब्रह्मचारिणः सतान्हनत्रीणः एतच्छिष्यगण सहितस्य
श्रावणकेमासि श्रोषधीभावपेचस्यांवाहस्तेनवापोषमासस्यरोहिणीनक्षत्र
मारभ्य अथवामध्यमाष्टकामारभ्य भुत्सृष्टानां ऋग्यजुःसामाथर्वणानांतथा
वाकोवाक्येतिहासपुराणानांगाथानाराशंस्यादीनांचसम्यगाध्यायनद्वारातथ
वातेमावास्यायामितिस्वचोक्तत्रयस्त्रिंशत्स्ववर्णानाध्यायेषु स्कन्दत्स्कृक्क सर्वग्रहे
षतिथिषपिग्मादान्मातः बाह्य अपराधावध्ययनदोषनिरस्त्यर्थं हस्वदीर्घप्लुत

भेदभिन्नानांवर्णानां अशुद्ध वा प्रयोगजनितदोषनिवृत्त्यर्थंप्रगृह्यसंधिकरण्याः
प्रगृह्यसंध्यकरणादिव्याकरणदोषदूषितानांचपदानांसंस्कारसिद्ध्यर्थंत
थानुदात्तादिसमस्तस्वराणांतन्नभेदानांचपदक्रमादिविकृतिकालेषुनित्यस्य
तानस्वरस्य अन्यथाप्रयोगजनितदोषपरिहारार्थंतथास्थानप्रयत्नयोवा
हीनामन्यथापठनदोषनिवृत्त्यर्थंतथापौर्वापर्यागतानकृत्रष्ठभेनोक्तमंगीमं
गजनितदोषनिवृत्त्यर्थंतथास्नानहोमजपहोमयज्ञकर्मकालेषुतत्तत्कर्मप्रयु
क्ततत्तन्मंत्राणां अन्यथाप्रयोग अन्यथा अप्रयोगयोगा अन्यथाप्रयोगमं
त्रविपर्यासादिदोषनिवृत्त्यर्थंतथादुःशब्दस्वरतोवर्णतोवेत्यादिस्मृत्युक्तदो
षदर्शनभयात्शिक्षादिग्रंथोक्तपाठकाध्यमत्वाद्दोषपरिहारार्थंचतथावि

मार्त•
२६॥

घाहवै ब्रौल्लयमाज्ञ नामेतिनिरुक्तोक्ता नामस्वरूपकाय अनूजवे अयतात्मने शिष्याय
अध्यापनदोषनिवृत्त्यर्थं तत्र ऋग्वेदयजुर्वेदसामवेदाथर्ववेदानां पृथिव्यंतरिक्षवा
युद्यौः सूर्यादिकचंद्रादिदेवतानां पूर्वोत्तरांगसहितानां। यजमानपूर्वकं कश्यपाद्यृषिर
जनप्रत्यक्षमुखेभ्यःपठपविष्टेभ्यः शिष्येभ्य ॐकारपूर्वकं त्रिःसावित्री अध्यायादीन्नृ
